अथलघुचाणाक्यराजनीतीप्रारंभः ॥१॥

१ श्रीगणेशाय नमः॥ अथ लघुचाणाक्यराजनीतिप्रा
रंभः॥ प्रणम्य शंकरं देवं ब्रह्माणं च जगद्गुरुं॥ विष्णुं
प्रणम्य शिरसा वक्ष्येहं शास्त्रमुत्तमं॥१॥ चाणक्ये
न स्वयं प्रोक्तं राजनीतिसमुच्चयं॥ तदहं संप्रवक्ष्या
मि नराणां बुद्धिवर्द्धनं॥२॥ अतोर्थे पठ्यते शास्त्रं
कीर्तिर्लोकेषु जायते॥ कीर्तिमान् पूज्यते लोके परमे
ह च मानसः॥३॥ वल्लीपलित कार्येन कर्तव्यः श्रुतिसं
ग्रहः॥ न तस्य धनिनो यांति यस्य यांति बहुश्रुताः॥४॥
श्रुत्वा धर्मं विजानाति श्रुत्वा त्यजति दुर्मतिं॥ श्रुत्वा ज्ञा

तमवाप्नोति श्च्यामोक्षं च गच्छति ॥५॥ दत्तं यथ्यविरा

गाय न धर्माय न शांतय ॥ किं तेन पठितेनापि काक

१ भाषितमेव तत् ॥६॥ खंडं खंडेषु पांडित्यं मयकी

नच मैथुनं ॥ भोजनं च पराधीनं तिस्रोजं पुंसां विडंब

ना ॥७॥ परं परार्थपारं वा आहारेध्यः सुभाषितं मूर्खे

र्वोपि मज्जंतां यांति नदीभिः सागरो यथा ॥८॥ नदीति

रेषु वृक्षा याश्च नारी नरं कुशाः ॥ मंत्रहीनश्च यो राजा

न भवंति चिरायुषं ॥९॥ सेवितव्यो महावृक्षः फलछा

या समन्वितैः ॥ यदि दैवात् फलं नास्ति छाया केन नि

चारिता॥१०॥ उत्तमैः सह संगः स्यात्सज्जनैः सह सत्कथां
आलुब्धैः सह मित्रत्वं कृत्वा नैवावसीदति ॥११॥
॥ श्रीलघुचाणक्यराजनीतौ प्रथमोऽध्यायः ॥१॥
अतिदानाद्बलिर्बद्धो नष्टो मानात्सुयोधनः॥ विन
ष्टो रावणो लौल्यादिति सर्वत्र वर्जयेत्॥१॥ अति रू
परिसीता अतिगर्वेषु रावणः॥ अतिबलीमा हा
रामो लंकायेन क्षयं कृता॥२॥ अल्पानां मुखहोवेण
बध्यैते शुकसारिका॥ बकास्तत्र न बध्यंते मौनं
सर्वार्थसाधनं॥३॥ समाधनुर्गृहीतस्य दुर्जनः

किं करिष्यति॥ अतृणे पतितो वन्हिः स्वयमेव
प्रशाम्यति॥४॥ धर्मस्य मूलं राजानस्तपो मूलं
च भूसुराः॥ ब्राह्मणो यत्र पूज्यंते तत्र धर्मः सना
तनः॥५॥ राज्ञि धर्मिणि धर्मज्ञाः पापाः पापे सम
समाः॥ राजानमनुवर्तंते यथा राजा तथा प्रजाः
॥६॥ बुध्वा बोध्यानि शास्त्राणि बुद्धीशास्त्रं प्र
बोधयत्॥ मत्स्यश्चे विकूते दीपे च स्नूहीनो न प
श्यति॥७॥ पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिं
तकाः॥ सर्वे वेसनिनो मूर्खाः यः क्रियावान्सुपु

जितः॥ ८॥ परोपदेशकुशलाः दृश्यन्ते बहवो नराः स्वभावमनुवर्त्तन्ते सहस्रेषु पि दुर्लभः॥ ९॥ हतं ज्ञानं क्रियाहीनं हता आज्ञानिनो नराः॥ हतं निर्नायकं सैन्यं भर्तृहीनाः स्त्रियो हताः॥ १०॥ केचिदज्ञानतो नष्टाः केचिन्नष्टाः प्रमादतः॥ केचिज्ज्ञानविलेपेन केचिन्नष्टौस्तु नाशितः॥ ११॥ अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः॥ परपरिवारनिरतैः क्वचित्क्वचिन्मण्डिता वसुधा॥ १२॥ इति श्रीलघुचाणक्यराजनीतौ द्वितीयोऽध्यायः॥ २॥

अन्यथा वेदशास्त्राणि पंडितज्ञानमन्यथा ॥ अ
न्यथा तत्सदंशांते लोकाः पश्यंति चान्यथा ॥ १ ॥
आग्निहोत्रं विना वेदो न च दानं विना क्रियाः ॥ न
भावाद्भिना सिद्धिः स्तस्माद्भावो हि कारणं ॥ २ ॥ अ
ग्निहोत्रेषु विप्राणां हृदि देवो मनीषिणां ॥ प्रति
मा स्वाल्पबुद्धीनां सर्वत्र विदितात्मनां ॥ ३ ॥ काष्ठ
पाषाणधातूनां कृत्वा भावं निवेदयेत् ॥ अज्ञाभ
क्ति स्तथा भ्यासस्तथा विष्णुप्रसीदति ॥ ४ ॥ न दे
वो विद्यते काष्ठे न पाषाणे न मृन्मये ॥ भावेषु वि

भृतेदेवः स्तस्माद्भावो ऽहि कारणं ॥५॥ मंत्रे तीर्थे द्विजे
देवे दैवज्ञे भिषजे गुरौ । यादृशी भावना यस्य सिद्धि
र्भवति तादृशी ॥६॥ शांति तुल्यं तपो नास्ति न संतो
षात्परं सुखं । न च तृष्णासमो व्याधिर्न च धर्मो
दयापरः ॥७॥ क्रोधो वैवस्वतो राजा तृष्णा वैतरणी
नदी । विद्या कामदुघा धेनुः संतोषो नंदनं वनं ॥८॥
कोऽतिभारः समर्थानां किं दूरं व्यवसायिनां ॥ को
विदेशः सुविद्यानां कः परः प्रियवादिनां ॥९॥ गु
णं पृच्छस्व मा रूपं शीलं पृच्छस्व मा कुलं ॥ सिद्धिपृ

ष्टस्य मा विद्यां भोगं दुष्टस्य माधनं ॥११॥ अगुणस्य
हतं रूपं अशीलस्य हतं कुलं ॥ असिद्धस्य हता विद्यां
अभोगस्य हतं धनं ॥१२॥ गुणो भूषयते रूपं शीलं भू
षयते कुलं ॥ सिद्धि भूषयते विद्यां भोगो भूषयते ध
५ नं ॥१३॥ इती श्री गरुपुवा॰ ॥ राजनी॰ ॥ नीतीसो॰ ॥४४॥
शुचि भूमिगतं तोयं शुचिर्नारी पतीव्रता ॥ शुचि
क्षेमकरो राजा संतोषी ब्राह्मण शुचिः ॥१॥ अशुचि
भूमिगतं तोयं वर्ज्जलेपो न विद्यते ॥ लेपस्थानेप
रिस्पृश्य अन्येस्थाने भवेत् शुचि ॥२॥ असंतुष्टा

द्विज्ञानष्टाः संतुष्टाश्च महीपतीः ॥ सलज्जा गणि
कानष्टा निर्लज्जाश्च कुलांगना ॥२॥ हष्टो चेमा
समाकीर्णो दृष्टो राजा सुधर्मिकः ॥ दृष्टो पती
व्रता नारी ग्रहं तणमयं दृष्टं ॥४॥ पूर्वाह्नेच कृषिं
पश्येमाध्याह्नेच ग्रहं सदा ॥ आपराह्ने धनं पश्ये
त्पुत्रं पश्य च निस्परा ॥५॥ माता महानसं यो
ज्या गृह कार्येषु वै सुतः ॥ भार्या च धर्म कार्येषु नि
त्यमेधावलोकयेत् ॥६॥ किं करोति नरः प्राज्ञः
शूरो वा प्यथ पंडितः ॥ दैव यस्य खला न्वेषिक

रोति विफलाः क्रियाः ॥७॥ ऐश्वर्ये वा सुविस्तीर्णे
व्यसने वा सुदारुणे ॥ रंध्रे च पुरुषो बध्वा सूतांते
नोपभीयते ॥८॥ विधवा सह भर्त्तोन तु देयाकु
6 श्चिाव्यके ॥ विद्यया ज्ञापितो मूर्खः पश्चात्संजाय
ते रिपुः ॥९॥ उपकारशतेनापि दानैश्चासत्कवि
स्तरैः ॥ लालनाप्रीतिपूर्वाश्च अग्राह्यो भगिनी
सुतः ॥१०॥ नाधिपत्यसदा देयं भागिनेयाय कि
चनः ॥ कालेन सोपि भवति रिपुस्थाने मातुलान्
रिपुः ॥११॥ यस्य न ज्ञायते शीलं कुलं विद्या न

रस्यच॥ कस्तेनसहविश्वासंपुमान्नकेद्विचक्षण:
॥१०॥ जननीदूषितायस्य अस्तित्वंनकरोतियः॥ स
र्वेशास्त्रविहीनेषुविश्वासनकुर्यात्तेषु॥११॥ मामा
तोकृत्सस्सर्पअपावकोदुर्जनश्चयः॥ नोपमीतेनग
हंतेपंचमोभगिनीसुत:॥१४॥ इतिश्रीलघु
राजनीतौचतुर्थो० कावेश्रीतिश्च माजोरैः कासीत
रवनीपतौ॥ गणिकास्मिश्च कासीतिः कासीति
भिक्षुकैः सह॥१॥ यथारक्षि:समुद्रेषुभुक्तस्यो
परिभोजनं॥२ वंश्रीतिःरवलेसार्द्धंमुपनार्थेव

सीरंतिः॥२॥मागाः पित्रुनविभा सम्भमायं पूर्वसंस्थि
तः॥ चिरकालोऽपि जीर्णोऽपि दृश्यते भुजंगमः॥३॥
सुपिलापरचिताभितन्वंग्याः पतितौ स्तनौ॥ परोपता
पीयाऽन्याऽभिसकृथं सुखमश्नुते॥४॥ परं क्षिपति दोषे
ण वर्तमानेन स्वयं यथा॥ खलश्च सहजं दोषं प्रका
शयति स्वात्मनो॥५॥ खलः सर्षपमात्राणि परच्छिद्रा
णि पश्यति॥ आत्मनो बिल्वमात्राणि पश्यन्नपि न
पश्यति॥६॥ स्वच्छन्देन्यं परस्यापि यद्वैन्यं मधुसर्पिषः॥
यद्वैन्यं गंधमात्राढ्यैः सर्वमेव च दुःखदं॥७॥ मक्षिका

८ रणमिछंति धनमिछंति पार्थिवाः। नीचाः कल
हमिछंति शांतिमिछंति साधवः॥५॥ धीराणां भूषणं
विद्या राज्ञां भूषणं मंत्रिणः। भूषणं च पतिः स्त्रीणां
शीलं सर्वस्य भूषणं॥६॥ सर्पः क्रूरः खलः क्रूरः स
र्पात्क्रूरतरः खलः। मंत्रेण शाम्यते सर्पः खलः
केनोपशाम्यति॥७॥ पुस्तकेषु च या विद्या परह
स्तेषु यद्धनं। कार्यसाधनकालेषु न सा विद्या न त
द्धनं॥८॥ इति श्रीलघु०राजनी० पंचमोध्यायः॥५॥
सिंहरूपेण राजानो व्याघ्ररूपेण मंत्रिणः भ

स्यादग्रघरूपेण क्षयंयाति हितंप्रजाः ॥१॥ अरण्ये
नचपुन्नागास्सश्वरथपत्तयः ॥ संग्रामकाले श्री
रक्षितराज्ञोब्रह्मस्वभक्षणात् ॥२॥ अन्यायोपार्जितं
द्रव्यंदशवर्षाणितिष्ठति ॥ प्राप्ते तु षोडशे वर्षे स
8 मूलंचविनश्यति ॥३॥ वस्त्रपादपरिधाणंबहुक्षि
राअधेनवः ॥ औषधंबीजमाहारंयथालभ्यंतथा
क्रयेत् ॥४॥ राकूठः शालिनोगावोजलमास्कंदनंव
ने अनूपः पर्वताराजादुर्भिक्षेनचवर्तयः ॥५॥ ऽक
ऽविद्याप्रधानोपिबहुज्ञानीभवेन्नरः सुभाषित ॥

निरक्षेपतयाऽनेशास्त्रो भूतानिवै ॥६॥ सुभागवत
मयेद्रव्ये: संग्रहं न करोति यः ॥ सर्वोकसस्थाव
यज्ञेषु क्रीमदास्यतिदक्षिणां ॥७॥ शूराश्च कृतवि
द्याश्च याश्च रूपयुतास्त्रियः ॥ यत्र यत्रागमिष्यंति
तत्र तत्र कृतालयाः ॥८॥ विधेत्वं च नृपत्वं च नैक
तुल्यं कदाचन ॥ स्वदेशे पूज्यते राजा विद्वान् सर्व
त्र पूज्यते ॥९॥ विद्यया सह्यते लोके पूज्यते चोत्त
मैः सदा ॥ विद्याहीनो नरः प्राज्ञः सभामध्ये न शोभ
ते ॥१०॥ सुरूपेणापि मूर्खेण गत्वा च विपुलां सभां ॥

रक्षणीयां स्वकां जिह्वां मार्या हुआ रणीयथा ॥११॥

॥इति॰लघु॰राजनी॰॥नवाध्यायः॥८॥

किं कुलेन विशालेन विद्याहीनस्य देहिनः ॥ अ
१ कुलीनोपि विद्वान् यो देवैस्तु पूज्यते ॥१॥ केना
पि कुवृक्षेण दह्यमानेन वह्निना दह्यते तद्वनं सर्वं
कुपुत्रेण कुलं यथा ॥२॥ केनापि सुपुत्रेण विद्या
युक्तेन साधुना कुलं पुरुषसिंहेन चंद्रेणेव प्रका
शितं ॥३॥ केनापि सुवृक्षेण पुष्पितेन सुगंधिना
वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ॥४॥ कोपि

९ गुणवान्कुओमानीगुणग्राहंभवेत्॥४॥कअंद्रस्त
मोहंतिनचतारासहस्रकं॥५॥किंजातैबहुभिःपुत्रैः
शोकसंतापकारकैः॥वरमेकःकुलालंबीयत्रवि
श्रमतेकुलं॥६॥सुखार्थीसंत्यजेद्विद्यांविद्यार्थीसं
त्यजेत्सुखं॥सुखिनश्चकुतोविद्याकुतोविद्यार्थिनः
सुखं॥७॥गुणाःकुर्वंतिदूतत्वंदूरेपिवसतांसतां
केतकीगंधमाघ्रायस्वयंगच्छंतिषट्पदाः॥८॥कोकि
लानांस्वरोरूपंनारीरूपंपतिव्रता॥विद्यारूपंकु
रूपाणांक्षमारूपंतपस्विनां॥९॥नालघुर्यंशिखरंमे

रोनर्गतिर्नीचैरसातलं॥ व्यवसायद्वितीयानांना
स्तिपारंमहोदधेः॥१०॥ पुस्तकेप्रत्ययाधीतंनगुरुसं
न्निधौनशोभते॥ सभामध्येहंसमध्येबकोयथा॥११॥
मांतापेशीमयूराक्षैर्मुखैश्चाक्षरवर्जितैः॥ पुंसु
भिः पुरुषाकारैर्भाराक्रांताचमेदिनी॥१२॥ एक
मप्यक्षरं यस्तुगुरुःशिष्येनिवेदयेत्॥ पृथिव्यां
नास्तितद्द्रव्यंयद्दत्वाप्यनृणीभवेत्॥१३॥ एकाक्ष
रप्रदातारं योगुरुंनाभिमन्यते॥ श्वानयोनिशतंगत्वा
चांडालेष्वपिजायते॥१४॥ अक्षराणिविचित्राणि

यनजानंतिमानवाः॥ बलिवर्धसमास्तेवैखुरश्रृंगवि
वर्जितः॥१५॥ इतीश्रीलघुचाणाक्यराजनीतौस
प्तमो॰ धनवान्नकुलीनोपिकुलीनोधनवर्जितः॥ वि
द्यानसुजातवंशोपिनिर्धनःपरिभूयते॥१॥ धनही
नोनहीनस्तुधनेवाकस्यनिश्चयं॥ विद्याज्ञानेन
याहीनःसर्वहीनस्तुमे॥२॥ वयोवृद्धास्तपोवृद्धा
ज्ञानवृद्धास्तथैवच॥ सर्वेतेधनवृद्धस्यद्वारेतिष्ठ
तिकिंकराः॥३॥ सुखस्यदुःखस्यनकोपिदातापरोद
दातीतिकुबुद्धिरेषा॥ पुराकृतंकर्मतदेवभुज्यते॥

रीरहेचिंतयेयत्वयाकृतं ॥४॥ विद्यायाभाजनंक
श्चित्कश्चिदर्थस्यभाजनं ॥ उभयोर्भाजनंकश्चित्
कश्चिन्नानोभयोरपि ॥५॥ नचैलानीरस्रजंतेग
र्भस्थ=स्यैवदेहिनः ॥ आयुःकर्मचवित्तंचविद्या
निधनमेवच ॥६॥ लिखिताचित्रगुप्तेनललाटेक्ष
रमालिका ॥ तांदेवोनैवशक्नोतिवंचितुंतेश्चिद्दरै
रपि ॥७॥ भवितव्यंयथायनेनाशोभवतिचान्यथा ॥
नियतेतेनमार्गेणस्वयंवातनगच्छति ॥८॥ मनय
मैवमोक्षंसुखंवादुःखमेवच ॥ सततंबध्वार

१२ ज्वेवज्ञलाद्दैवेन नीयते॥६॥ संसारविषवृक्षस्य द्वे
फले अमृतोपमे॥ काव्यामृतरसास्वादः संगमः स
ज्जनैः सह॥७॥ वनेरणेशत्रुजलाग्निमध्ये महा
र्णवे पर्वतसंकटे वा॥ सुप्तं प्रमत्तं विषमस्थितं वा
रक्षंति पुण्यानि पुराकृतानि॥८॥ प्राप्तव्यमर्थं लभ
ते मनुष्यो दैवोऽपि तं लंघयितुं न शक्तः॥ तस्मान्न
शोचामि न विस्मयो मे यदस्मदीयं न हि तत्परेषां॥९॥

इति श्री लघु० राजनीतौ अष्टमोऽध्यायः॥८॥

गणाध्यक्षिरसाविष्णुं मैत्रेयं व्यापिनं प्रभुं॥ न

नाशास्त्रोद्धृतंवक्ष्येराजनीतिसमुच्चयं॥१॥धर्मो
पदेशंविनयंकार्याकार्यंशुभाशुभं॥अधिगम्य
स्थिरंचास्येनरोजानातितत्वतः॥२॥तदहंसंप्रव
क्ष्यामिनराणांबुद्धिवर्द्धनं॥येनविज्ञानमात्रेणस
र्वज्ञत्वंहिजायते॥३॥मूर्खशिष्योपदेशेनदुष्टस्त्री
भरणेनच॥दुःखीनांसंप्रयोगेनपंडितोप्यवसी
दति॥४॥दुष्टभार्याशठंमित्रंभृत्यश्चोत्तरदायकः
ससर्पेचगृहेवासोमृत्युरेवनसंशयः॥५॥आप
दार्थेधनंरक्षेद्दारान्रक्षेद्धनैरपि॥आत्मानंसर्वतो

रक्षेद्दारैरपिधनैरपि ॥ ६ ॥ त्यजेदेकं कुलस्यार्थे ग्रा
मस्यार्थे कुलं त्यजेत् ॥ ग्रामं जनपदं स्यार्थे आत्मार्थे
पृथिवीं त्यजेत् ॥ ७ ॥ चलत्येकेन पादेन तिष्ठत्येकेन पं
डितः ॥ नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥ ८ ॥
यस्मिन्देशे न सन्मानं न च वृत्तिर्न बांधवाः ॥ न च वि
ध्या गमः कश्चित् तत्र वासं न कारयेत् ॥ ९ ॥ पंच यत्र न वि
धंते तेन तत्र दिवसं वसेत् ॥ लोकयात्रा भयं लज्जा दाक्षि
ण्यं धर्मशीलता ॥ १० ॥ पंच यत्र न विधंते न कुर्यात्तत्र
संगतिः ॥ धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पंचमः ॥ ११ ॥

ज्ञातव्याः प्रेषणे भृत्या बांधवा व्यसनागमे मित्रं चा
पत्कालेन भार्या च विभवक्षये १२ आतुरे व्यसने
प्राप्ते दुर्भिक्षे शत्रुसंकटे राजद्वारे स्मशाने च य
स्तिष्ठति बांधवाः १२ यो ध्रुवाणि परित्यज्ये
अध्रुवं किलि सेवते ध्रुवाणि तस्य नश्यंति अ
ध्रुवानष्टमेव च १४ वरयेत्कुलजां प्राज्ञो विरू
पामपि कन्यकां रूपवंतीं न नीचानां विवाहाः
सदृशो कुले १५ विषादप्यमृतं ग्राह्यं अमेध्या
दपि कांचनं नीचादप्युत्तमा विद्या स्त्रीरत्नं दुः

१३ कुलादपि ॥ ६ ॥ नदीनां च नखीनां च शृंगीणां शस्त्रपाणिनां ॥ विश्वासो नैव कर्तव्यो स्त्रीषु राजकुलेषु च ॥ ७ ॥ स्त्रीणां द्विगुण आहारो बुद्धिस्तासां चतुर्गुणा ॥ षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥ ८ ॥ इति श्रीलघुचा॰ राजनीतौ नवमोऽध्यायः ॥ ९ ॥

अनृतं साहसं माया मूर्खत्वमतिलुब्धता ॥ अशौचं निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः ॥ १ ॥ भोज्यं भोजनशक्तिश्च रतिशक्तिर्वरस्त्रियः ॥ विभवो दानशक्तिश्च नाल्पस्य तपसः फलं ॥ २ ॥ यस्य पुत्रो वशी

नित्यं भार्याचित्तानुवर्तिनी ॥ विभवेऽपि ससंतोषः
स्तस्य स्वर्ग इहैव हि ॥ ३ ॥ ते पुत्रा ये पितुर्भक्ताः स पि
ता यस्तु पोषकः ॥ तन्मित्रं यस्तु विश्वासः स देशो
15 यत्र जीवति ॥ ४ ॥ परोक्षे कार्यहंतारं प्रत्यक्षे प्रि
यवादिनं ॥ वर्जयेत्तादृशं मित्रं विषकुंभं पयोमुखं ॥ ५ ॥
न विश्वसेत्कुमित्रस्य मित्रस्यापि न विश्वसेत् ॥ कदा
चित्कुपितो मित्रो सर्वगुह्यं प्रकाशयेत् ॥ ६ ॥ मन
सा चिंतितं कार्यं वाचा नैव प्रकाशयेत् ॥ मंत्ररक्ष
णगूढा सा कार्यसिद्धिर्न जायते ॥ ७ ॥ इतरथे

१४ कुलिनानां नृपाः कुर्वंति संग्रहं ॥ आदिमध्यावसा
नेषु न ते यांति शांतिक्रियां ॥८॥ कष्टं च खलु मूर्ख
त्वं कष्टं दारिद्र्य यौवनं ॥ कष्टोपि कष्टतरं परगृहं २
विदेशजं ॥९॥ प्रलये भिन्नमर्यादा भवंति खलु साग
राः ॥ सागरा भेदमिछंति प्रलयेपि न साधवः ॥१०॥
खलानां कंटकानां च द्विधैव प्रतिक्रिया ॥ उपान
त्मुखभंगो वा दूरितः परिवर्जयेत् ॥११॥ शैले शै
ले न माणिक्यं मौक्तिकं न गजे गजे ॥ साधवो न
हि सर्वत्र चंदनं न वने वने ॥१२॥ मूर्खस्तु परिहर्त

व्यः सत्पक्षं द्विपदः पशुः॥ मिथ्यते वाक्यशोभ्ये
न अहंसः कूटको यथा॥१३॥ पुत्रास्तु विविधैः शीलै
र्नियोज्याः सततं बुधैः॥ नीतिज्ञा बुद्धिसंपन्ना भवि
ष्यंति सुहृज्जितः॥१४॥ माता वैरी पिता शत्रुर्बालो
येन न पंडितः॥ न शोभते सभामध्ये हंसमध्ये
बको यथा॥१५॥ श्लोकेन च तदर्थेन पादेनैकाक्ष
रेण च॥ अबध्यं दिवसं कुर्याद्दानाध्ययनकर्म
सु॥१६॥ लालनाद्बहवो दोषास्ताडनाद्बहवो गु
णाः॥ तस्मात्सुतं च शिष्यं च ताडयेत् न तु लालये
त्॥१७॥

इति॰ लघुचा॰ राजनी॰ दशमोऽध्यायः॥१०॥

लालयेत्पंचवर्षाणि दशवर्षाणि ताडयेत्॥ प्राप्ते तु
षोडशे वर्षे पुत्रमित्रसमाचरेत्॥१॥ रूपयौ
वनसंपन्ना विशालकुलसंभवाः॥ सभामध्ये न
शोभंते निर्गंधा इव किंशुकाः॥२॥ एकेनैव सुपुत्रे
ण सिंही स्वपति निर्भया॥ सहैव दशभिः पुत्रैर्भारं
वहति गर्दभी॥३॥ एकोदरसमुत्पन्ना एकनक्षत्र
संभवाः॥ न भवंति समाः शीलाः यथा वदरिकंट
काः॥४॥ नस्तु स्वं धनलुब्धस्य न धर्मो कुहचेतसां

न चार्थभाग्यहीनस्य औषधं न गतायुषः ॥५॥ उ
पसर्गोरिपोश्चक्रे दुर्भिक्षे च भयावहे ॥ असाधु
जनसंपर्के यः पलायति स जीवति ॥६॥ परान्नं प
रवस्त्रं च परशय्या परस्त्रियः ॥ परवेश्मनिवास
श्च दूरतः परिवर्जयेत् ॥७॥ सुखोयमप्युज्झितेधा
न्यं यमसुशोचितं ॥ नरं तकुलहोयमत ओस्ते कम
लश्रियः ॥८॥ नहि संसर्गदोषेण सच्छन्नां यांति
साधवः ॥ भुजंगवेष्टमानोपि चंदनो न विषायं
ति ॥९॥ शीलसत्यमनालस्यं पांडित्यं मित्रसंग्रहः ॥

16

१६ आचौरहरजीयानिवेचैतान्यक्षयोनिधिं॥१०॥आ
भ्रद्यायात्ताद्गनीचसनास्थलेजलं॥वेश्या
संगकुमित्रेचघनेतेयुद्धेपमाः॥११॥उपदेशो
हिमूर्खाणांप्रकोपायनशांतये॥पयःपानंभुजं
गानांकेवलंविषवर्धनं॥१२॥पठितेगणितेशीले
तथासर्वकुलेषुच॥धर्मार्थकाममोक्षस्यसर्वे
प्रकुशीलीभवेत्॥१३॥धर्मार्थकाममोक्षाणांयस्यै
कोहिनविद्यते॥जन्मजन्मसुदुःखेचचारणंतस्य
केवलं॥१४॥अग्निरापःस्त्रियोमूर्खाः सर्पराजकु

17

ज्ञानि च॥ निसंपन्ने सेव्यामि सधः ज्ञाता हरा
णि रात्रु॥७५॥ आधूमाद्व निर्लेते पुमसिमा णि
बांधवाः॥ यन स्वर्गे भवेन्मेसंत त्कर्म सुकृतेकु
रु॥७६॥ शोको नाशयते प्रज्ञां शोको नाशयते धृ
ति॥ शोको नाशयते धर्मं नास्ति शोकसमो रिपुः॥७७॥
निज्ञातात्कृतस्ते पापरूपा व्याधिपीडितः॥ व्य
भिचारकलत्रा ध्ययेचान्ये कृतवैरिणः॥७८॥ पर
भिभवति विरूपो वस्त्रालंकार परिवेषहिनः॥ स
ज्जनसभामुपतिष्ठोरं जलेविधाऽपिकृपुरुषः॥७९॥

वर्जयेद्विदलं शूली कुष्ठी मांसं घृतं ज्वरी ॥ नवमन्नमती
सारी नेत्ररोगी तु मैथुनं २७ ॥ इति॰ व॰ पु॰ राज॰ प॰ काद
शो ॥ धर्ममर्थं च कामं च यथाशास्त्रं समाचरन् ॥ ब्राह्मे
मुहूर्ते चोत्थाय चिंतयेदात्मनो हितं ॥ कः सुका
नि मित्राणि को देशः कोव्ययागमः ॥ कश्चाहं का
च मे शक्तिरिति चिंतयेत्सदा ॥ २ ॥ व्यायामः कफ
नाशाय वातनाशाय मर्दनं ॥ स्नानं पित्तविनाशाय
ज्वरनाशाय लंघनं ॥ २ ॥ जनिता चोपनेता च यस्तु
विद्यां प्रयच्छति ॥ अन्नदाता भयत्राता पंचैते पि

18

तरः स्मृताः ॥४॥ राजपत्नी गुरुःपत्नी मित्रप
त्नी तथैव च ॥ पत्नीमाता स्वमाता च पंचैते मा
तरः स्मृताः ॥५॥ यथा चतुर्भिः कनकं परीक्ष्य
ते ॥ निघर्षणछेदनतापताडनैः तथा चतुर्भिः पु
रुषं परीक्ष्यते श्रुतेन शीलेन कुलेन कर्मणा ॥६॥
गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ॥
पतिरेव गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ॥७॥
उत्तमस्यापि वर्णस्य नीचोपि गृहमागताः ॥ बा
लो वा यदि वा वृद्धः सर्वस्याभ्यागतो गुरुः ॥८

पार्थिवस्यतनुस्याऽभिमत्स्याणंचैवलक्षणं॥ये
नसेवर्द्धतेराज्यंभोगागारोविधीयते॥९॥वेदवेदांग
तत्वज्ञोजपहोमपरायणः॥आशीर्वादपरोनित्य
यषराज्ञःपुरोहितः॥१०॥प्रवीणःकुशलोदक्षः
परचित्तोपलक्षकः॥धीरोयुक्तार्थवादीचऽ
षदूतोविधीयते॥११॥स्कंधवान्यपटुःप्राज्ञःसत्व
वाहीजितेंद्रियः॥सर्वस्माहीसमाक्रोकीऽपता
धुःसलेखकः॥१२॥पितुर्वितामाहादक्षःशास्त्र
ज्ञोमिष्टपाचकः॥शौचयुक्तोथभक्तश्चसूपकाः

रः स उच्यते ॥१३॥ आयुर्वेदकृताभ्यासः सर्वभू=
ऽप्रियदर्शनः ॥ उक्तिहेतुसमायुक्तोऽय वैद्यो वि
धीयते ॥१४॥ समेस्तहये शास्त्रज्ञो वाहाने ऽरिपु
दर्शने ॥ समर्योर्थगुणोपेतो ह्यश्वाध्यक्षो वि
धीयते ॥१५॥ त्यजेत्स्वामिनमत्युग्रमत्युग्रात्कृ
पणं त्यजेत् ॥ कृपणादविशारदज्ञमविशेषा
ऽकृतघ्नकं ॥१६॥ आक्रम्य तु द्विजैर्मुक्तः परि
क्षीणस्तु बांधवैः ॥ भोगी च नरशार्दूलो राज
स्त्याज्यो हि शिष्यते ॥१७॥ सगतिः श्रेयसी पुंसां स्व

१६ पक्षेनान्यपक्षजा॥ तुषैरऽपि परिभ्रष्टो न प्ररोहंति
तंदुलः॥१८॥ राजा वेश्या यमो वन्हिः पंथा वालक च
याचकः॥ परं दुःखं न जानाति सप्तमो ग्रामकंटकः॥
॥१९॥ आलसं मुखरं स्तब्धं क्रूरं व्यसनिनं शठं॥ अ
संतुष्टमभक्तं च तेजेत् भृत्यं नराधिपः॥२०॥ उपदे
शो हि मुर्खाणां प्रकोपाय न शांतये॥ पयःपानं
भुजंगानां केवलं विषवर्द्धनं॥२१॥ इति श्रीलघु
चाणाक्यराजनीतौ द्वितीयोध्यायः॥२॥
वरं न राज्यं न कुराजराज्यं वरं न मित्रं न कुमित्र

२० मित्रं ॥ वरं न दारा न कुदारदारा वरं न शिष्यं न कु
शिष्यशिष्यं ॥१॥ कुराजराज्येन कुतः प्रजासु
खं कुमित्रमित्रेण कुतस्तु निर्वृतिः ॥ कुदारदारै
स्तु कुतो गृहे रतिः ॥ कुशिष्यमध्यापयतः कुतो
यशः ॥२॥ सिंहादेकं बकादेकं शिक्षेच्चत्वारि
कुक्कुटात् ॥ वायसात्पंच शिक्षेच्च षट्शुनस्त्री
णि गर्दभात् ॥३॥ प्रभूतं कार्यमल्पं वा यो नरः
कर्तुमिच्छति ॥ सर्वारंभेण तत्कार्यं सिंहादेकं प्रकी
र्तितं ॥४॥ इंद्रियाणि तु संयम्य बकवत्पंडितो न

२० र:॥ देशकालज्ञयोगज्ञः सर्वकार्याणि साधयेत् ॥१५॥
प्रागुत्थानं च युद्धं च संविभागश्च बंधुषु ॥ स्व
यमाक्रम्य भुंजीत शिक्षेच्चत्वारि कुक्कुटात् ॥१६॥ गू
ढमैथुनधार्ये च काचालयसंग्रहं ॥ अप्रमादी अ
विश्वासः पंच शिक्षेच्च वायसात् ॥१७॥ बह्वा
सी चाल्पसंतुष्टः सुनिद्रो शीघ्रचेतनः ॥ स्वामि
भक्तश्च शूरश्च षडेते श्वानतो गुणाः ॥१८॥ सु
श्रांतोपि वहेद्भारं शीतोष्णं न च विंदति ॥ संतु
ष्टश्च सदानंदं त्रीणि शिक्षेत रासभात् ॥१९॥

इतान् हि विंशद्गुणान् यश्चरिष्यंति मानवाः ॥
ते जयंति रिपून् सर्वान् जयाश्च भवंति ते ॥ ९ ॥ अ
र्थनाशं मनस्तापं गृहे दुश्चरितानि च ॥ वंचनं चा
पमानं च मति मान्न प्रकाशयेत् ॥ १ ॥ धनं धान्यं
प्रयोगेषु विद्यासंग्रहणेषु च ॥ आहारे व्यवहा
रे च त्यक्तलज्जा सुखी भवेत् ॥ ११ ॥ संतोषस्त्रिषु क
र्तव्यः स्वदारे भजने धने ॥ त्रिषु चैव न कर्तव्यो दा
ने चाध्ययने तथे ॥ १२ ॥ संतोषामृततृप्तानां यत्सु
खं शांतचेतसां ॥ न तच्च धनलुब्धानां मितश्चे

तस्यथावत्तां॥१४॥ द्वैगजौ विमर्मग्नि अदंपाल्तोःस्या
मिथस्तयोः॥ अंतरेन हि गंतव्यं हरस्य वृषभस्य च ॥१५॥
पादाभ्यां नस्पृशाद्ग्नि नगुरुं न च ब्राह्मणं॥ न गोंचै
न कुमारीं च न पुंश्चिं शिष्यकं तथा॥१६॥ हस्तो हस्तस
हस्रेण शतहस्तेन वाजिनं॥ शृंगिणो दशहस्ते
न देशत्यागे न दुर्जनः॥१७॥ गजं मं कुराह स्तेन कसा
हस्तेन वाजिनं॥ शृंगिणं पश्चिह स्तेन देशत्यागो न दु
र्जनः॥१८॥ इति श्री लघु॰ राजनी॰ त्रयोदशोध्यायः॥१३॥
ऊर्ध्वमर्थेग्रठहीपातूस्तब्धमंजलिकर्मणां॥ सम

तुल्यं बलं केशानुं विनयेन बलेन च ॥१॥ अनुलोमेन ब
लिनं प्रतिलोमेन दुर्बलं ॥ यस्य यस्य हि तो भावस्त
४२ स्य तस्य हितो नरः ॥२॥ बाहुवीर्यबलो राजा ब्रह्मा ब्र
ह्मविदां वरः ॥ रूपयौवनसंपत्ति स्त्रियं नवचाभान
पतं ॥३॥ नास्ति तस्करलोभ्यं गलापत्तेयन्त्र नस्यगते ॥
सरला स्तनच्छिद्रं ति कुब्जा स्ति हंति पारपा ॥४॥
यस्योरकंतअपतंत्ति हे सा स्तथैव पूर्णा पुनराअयं ॥
ति ॥५॥ उपार्जितानामर्थानां त्यागे एव हि रक्षणं ॥ तडा
गोदरसंस्थानां परिवाह इवांभसां ॥६॥ यस्यार्थास्तस्य

मित्राणि यस्यार्थास्तस्य बांधवाः ॥ यस्यार्थास्स पुमान्
लोके यस्यार्थास्स च पंडितः ॥७॥ तेजंति मित्राणि धनैर्वि
हीनं पुत्राश्च दाराश्च सुहृज्जनाश्च ॥ तमर्थवंतं पुन
राश्रयंति अर्थो हि लोके पुरुषस्य बंधुः ॥८॥ अर्थहीन
विहीनस्य पुरुषस्याल्पमेधसः ॥ उत्सन्नैते क्रियाः
सर्वा ग्रीष्मे च सरितो यथा ॥९॥ अर्थाः सर्वत्र पूज्यंते
नेशरीराणि देहिनः ॥ चांडालोपि नरः श्रेष्ठो यस्या
स्ति विपुलं धनं ॥१०॥ जिता धनवता दारा वस्त्रशारी
र्जिता सभा ॥ जितं रूपि मित्रारिश्चंगोभिरभ्यागतो
॥ जितः ॥११॥

वाल्मीकं मधुजालेच शुक्लपक्षेच चंद्रमाः॥राज्यप्र
यंच मैथुनं च स्तोकं स्तोकेन वर्द्धते॥१२॥शनैरर्थाः श
नैर्विद्याः शनैर्वर्षतमारुहेत्॥शनैर्धर्मश्च काम
अध्यायाम श्च शनैः शनैः॥१३॥अंजनस्य क्षयं
दृष्ट्वा वाल्मीकस्य च संचयं॥ अतिरेव हि पांडित्यं सम
३७ र्थोद्यमतरोध्ययः॥१४॥अर्थादेव चतुर्थांशात् व्य
यकर्म प्रवर्तते॥ मधुतैलं दीपा वा वित्तं भक्षाणिव
स्यसि॥१५॥आगमे यस्य चैवारि निर्गमे सार्द्ध पंच
॥ अतिविस्तर विस्तारे नाचरं मुंजते श्रियं॥१६॥

२३ कृतं देवगृहं पांडुसंसेवा चैव कुलीनता ॥ अयमेव परो ध
र्मो यावदर्थं न शोभयः ॥ १७ ॥ यजहुर्जसंसर्गं भजसा
धुसमागमं ॥ कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यतां
॥ १८ ॥ इति श्री लघु० राज० चतुर्थोध्यायः ॥ ४ ॥
बारटश्चतपश्चीचस्मूरश्चाप्यकनकृतः ॥ मद्यपस्त्री
जितः पापी राजद्वेष्टा विवर्जितो ॥ १ ॥ स्त्रियो विनश्यंति गर्वे
ण ब्राह्मणो राजसेवया ॥ गावो दूरप्रचारेण हिरण्यं
लोभलिप्तया ॥ २ ॥ यस्य भार्या विरूपाक्षी कश्मलाक
लहप्रिया उत्तरोत्तरवक्त्री च सा जरा न जरा जरा ॥ ३ ॥

यस्य भार्या ऽनुचरीदक्षा ऽनुतारमनुगामिनी ॥ नित्यं
मधुरभाषी च सा स्त्री च हरते मनः ॥४॥ सा भार्या य
गृहे दक्षा स भार्या या प्रियंवदा ॥ स भार्या या पति
प्राणा स भार्या यऽनुव्रति ॥५॥ अभोऽश्रिया च भा
२५ र्या स्त्रि केवेस्म निवासिनी ॥ कुत्सिता स्यस्कलज्ज्ञा या
देवतां सा मानुषी ॥६॥ सद्भावेन हि तुष्यंति देवा स
त्पुरुषा द्विजाः ॥ इतरे खानपानेन वाक्यदानेन पं
डिताः ॥७॥ उत्तमं प्रणिपातेन शूरं भेदेन योजयेत्
नीचमल्प प्रदानेन ईदृशं धनेन योजयेत् ॥८॥ नाग्नि

स्तव्यंतिकास्थानां नाथगानां महोदधिः ।। नासकः
सर्वभूतानां न हूणो वा मञ्जोचनं ।। ८ ।। महतां प्रसवं
याति विभंगो प्रिगारी पंसी ।। रंतभं मोहिनांगो
नां श्माशाने गिरौ विहारये ।। ७ ।। अपुत्रस्य गृहे शू
न्यं दिशा शून्या स्वबांधवैः ।। मूर्खस्य हृदयं शून्यं
सर्वशून्यं दरिद्रता ।। ११ ।। नाहि केन समाकाराहृसं
तको पि सज्जनाः ।। इतरे वदराकाराबहिरेव मनो
रमाः ।। १२ ।। यस्य पुत्रा न विद्वांसो न शूरा न च पंडिताः
अंधकारं कुलं तस्य नष्टं वै द्वेचरार्वरी ।। १३ ।। किंम

सेवितनरः प्राज्ञः स्तूयमानः स्वकर्मभिः॥ प्रायशो
हि मनुष्याणां बुद्धिः कर्मानुसारिणी॥१३॥ शार्वरी
दीपकश्चंद्रः प्रभाते रविदीपकः॥ त्रैलोक्यदीप
को धर्मः सुपुत्रः कुलदीपकः॥१५॥ यथा शिखा
मयूराणां नागानां च मणिर्यथा॥ तथा हि सर्वशा
25 स्त्राणां मुखे व्याकरणं स्मृतं॥१६॥ पक्षीणां बलमा
काशं मत्स्यानां च जलं बलं॥ नारीणां च बलं भर्ता
मुनीनां च तपो बलं॥१७॥ तस्मा च नरगाधेयं दुः
मूढाकेन सूर्यते॥ यामरद्भिर्विशिष्टे पूर्णोऽरवस्य

न्यते ॥ ७ ॥ यस्मिन् जीवति जीवंति पुत्रमित्राणि बांध
वाः ॥ सफलं जीवितं तस्य आत्मार्थे को न जीवति ॥ ९ ॥
इति श्रीलघु० राजनी० पंचदशो ऽध्यायः ॥ १५ ॥
यज्ञाजनं यद्द्विजभुक्तशेषं सा प्राज्ञता या न करोति पा
पं ॥ तत्सौहृदं यत्क्रियते परोक्षं दंभो विना यः क्रिय
ते स धर्मः ॥ १ ॥ कालेन रिपुणा संधिः काले मित्रेण
विग्रहः ॥ कार्यं कारणमाश्रित्य कालं क्षिपति पं
डितः ॥ २ ॥ कालः पचति भूतानि कालः संहरते
प्रजाः ॥ कालः सुप्तेषु जागर्ति कालो हि दुर

तिक्रमः ॥३॥ व्याधितस्यार्थहीनस्य देशांतरग
तस्य च । नरस्य शोकतप्तस्य सुहृद्दर्शनमोषधं ॥४॥
नित्यंस्नाता सुगंधा च नित्यंयावाप्रियवादिनी ॥
अल्पनिद्राः क्षमायाचा देवतासा न मानुषी ॥५॥
सततं मंगलैर्युक्ता सततं धर्मविस्तृतं । सततं च
दयायुक्ता सततं चानुगामिनी ॥६॥ भर्तुश्च सर्वदा
भक्ता सततं पथ्यभोजनं ॥ अन्यदा च प्रियायुक्ता
सर्वसौभाग्यदायिनी ॥७॥ भुजंगमेनेरम निहष्ट
नं के व्याधौ चिकित्सा विनिवर्त्तते देहे ॥ हस्तच्छुने

२६ वैरिणि चासुबद्धेः शस्त्रनकस्यातरते धृतिः का॥ ७॥
हंसो न भाति बलिभोजनवृंदमध्ये गोमायुमंडल
गतो न विभाति सिंहः॥ जात्या न भाति तुरगः खर
यूथमध्ये विद्या न भाति पुरुषेषु निरक्षरेषु॥ ८॥
वाजिवारणलोहानां काष्ठपाषाणवाससं। नारी
पुरुषतोयानां मंत्तरं बहु चांतरं॥ ९॥ अभ्यागतो
जामाता गावः प्रथम सूतिका॥ अंतः पुरगतो रा
राजा दुरितः परिवर्जयत्॥ ॥ पश्यनां त्तिसर्वेषां
हो शास्त्रेतस्य करोति किं॥ लोचनाभ्यां विहीनस्य

र्पणाः किंकरिष्यति॥१२॥गुणेषु क्रियतां यत्नः कि
माटोपैः प्रयोजनं॥ विक्रीयंते न घंटाभिर्गावः
क्षीरविवर्जिताः॥१३॥पंडितेषु गुणाः सर्वे मूर्खे
दोषास्तु केवलं॥तस्मात् मुर्खसहस्रेषु प्राज्ञ एको
नइष्यते॥१४॥शोकारातिभयत्राणं प्रीतिविश्रं
भभाजनं॥ केन रत्नमिदं श्रेष्ठं मित्रमित्यक्षरं
द्वयं॥१५॥ सज्ञापुरुषशरीरस्य किं करिष्यति शास्त्र
वः॥ छत्रोपानत्प्रयुक्तस्य नारिधारातपं यथा॥१६॥
संपदो नतचित्तानां तापायंति विपत्तयः॥ तणो

पचयत्संपर्कमेदिनीशाहामाप्नुयात् ॥१७॥ महान
दीप्रतरणं महापुरुषविग्रहं । महाजनविरोधं च न
कर्त्तव्यं कदाचन ॥१८॥ सिद्धमंत्रौषधं धर्मं गृहच्छिद्रं
च मैथुनं । कुभुक्तं कुमंत्रं चैव वचनं न प्रकाश
येत् ॥१९॥ निर्त्यच्छेदंतृणानां क्षितिलिनखलिखनं
पादयोरत्यशौचं । दंतानामत्यधावं वसनमली
नता रूक्षता मूर्द्धजानां ॥२०॥ द्वे संध्ये चापि नि
द्रा वसनमलिनता ग्रासहस्यातिरेकः । स्वांगे
पीठे च वाद्यं निपतमपि हरत्लेशावस्यापि

२८

श्मी॥ २१ ॥ विषं कुपथ्यता विधाविषं व्याधौ कु
भोजनं ॥ विषं गोष्ठिर्दरिद्रस्य वृद्धस्य तरुणी॥ वि
षं ॥ २२ ॥ सुखं पद्मदलाकारं वाचा चन्दनशीतलं
हृदयं कस्तूरीतुल्यं विषं धूर्त्तलक्षणं ॥ २३ ॥ स
द्यो मांसं घृतं सद्यो बालास्त्रीक्षीरभोजनं॥ कू
पोदकं वटच्छाया वर्द्धते प्राणपोषकाः ॥ २४ ॥ शु
ष्कमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधिः ॥ प्र
भाते मैथुनं निद्रा सद्यः प्राणहराणि षट्॥ २५ ॥
नराणां सहमित्रत्वं न सर्वेण विवेषण च ॥ कुलं च

निर्मलैतमस्तीजगोपनगछति ॥२५॥ अगनिलो
अफलावेहानीलैवतफलैभतो ॥२६॥ रतिपुनफलो
हारादत्तमुक्तफलैधनं ॥२७॥ सलानतावपरूपा
मियवादिनिच ॥ हिंसारयालुपरवीर्यपरावस
ना ॥२८॥ भूरिश्रयायामचतुरगनिलधनागमाच
अस्यांगनेवनपनीलिरनेकरूपा ॥२९॥ इति श्री
लघुचाणाक्यराजनीतौ षोडशोध्यायः ॥१६॥
अधिकमासेशुक्लपक्षे अष्टम्यां गुरुवासरे ॥ सके
॥१७५५॥ ॥१८००॥
सआसे संमत् अठरासे अमतरा वर्षे द्वितियनेरवेन
लिखितं ॥ नारो आमतरांजनगावकर मुंगसाली